LITERATURE SET TEXT EXTRACTS
IGCSE Examination 2025 onwards

STUDENT STUDY AID

Copyright Sanskrit@StJames 2023 Updated 23.08.24

This material is Copyright Sanskrit@StJames (IEAL). Individuals may use this booklet freely for their own study.

Organisations and teachers may freely use this booklet but ensure that attribution is given to Sanskrit@StJames.

Donations are recommended as an expression of appreciation and to help the continuation of our work. Please contact us for details through the Contact Form at: https://www.sanskritexams.org.uk/contact/

Thank you.

1. Verse - the Bhagavad Gītā:

Twenty verses chosen from **eleven** chapters of Śrīmadbhagavadgītā (the Bhagavad Gītā), translated by Swami Chidbhavananda, published by Sri Ramakrishna Tapovanam, Tirupparaithurai, 2002 (later editions are available).

2. Sanskrit Prose – Stories from the Mahābhārata:

Six stories adapted from the Mahābhārata, not in sandhi.
Details are provided in this booklet.

3. Sanskrit Epic Civilisation:

Details are provided in a separate booklet on the website
https://www.sanskritexams.org.uk

4. Sanskrit Prose – Stories from the Pañcatantra

Three stories from the 'Pañcatantra of Viṣṇuśarman' published by Motilal Banarsidass Private Ltd., New Delhi, 2008.

Contents

Adapted Stories from the Mahābhārata 5
Story 1: A Strange Wife 5
Story 2: The Fisherman King's Daughter. 7
Story 3: Bhīṣma's Vow 8
Story 4: A Deer Curses Pāṇḍu 9
Story 5 : Paraśurāma Discovers Karṇa's Lie 10
Story 6: Droṇa's Son Tries to Destroy The Child in Uttarā's Womb 11
VERSE SET TEXT - The Bhagavad Gitā 13
पंचतन्त्रकथासंग्रहः Stories from the Pañcatantra 34
The Weighing Scales and the Merchant's son 35
The Lion, Jackal and the Cave 38
The Frog and the Snake 41
APPENDIX 44
Pañcatantra Extracts for 2025 blank texts 44

Adapted Stories from the Mahābhārata

A Supplementary Workbook which gives extra help for beginners, is available from the ISER website https://www.sanskritexams.org.uk.

Story 1: A Strange Wife

1. आसीत् नृपः शान्तनुः नाम । _____
2. सः अतीव साधुः नृपः सुखेन अजीवत् ।

   _____
3. तस्य तु एकः दोषः । तस्य दोषः कामः ।

   _____
4. एकदा शान्तनुः नद्याः समीपे अचरत् ।

   _____
5. सः नार्या सह अमिलत् ।

   _____
6. सा नारी देवी गङ्गा नाम । सा अतीव सुन्दरी नारी ।

   _____
7. मम भार्या भव दयया इति शान्तनुः अवदत् ।

   _____

8. गङ्गा अवदत् अहम् तव भार्या भविष्यामि ।

_____

9. किम् करोषि इति न कदापि माम् पृच्छ ।

_____

10. यदि तत् पृच्छसि तर्हि त्वाम् त्यजामि इति ॥

_____

Story 2: The Fisherman King's Daughter.

1. शान्तनोः अष्टमः पुत्रः भीष्मः नाम ।
2. एकदा भीष्मः शान्तनुम् आगच्छत् ।
3. त्वम् एव नृपः भविष्यसि इति शान्तनुः भीष्मम् अवदत् ।
4. एकदा तु शान्तनुः नद्याः तीरे अचरत् ।
5. वायौ सुगन्धः आसीत् ।
6. सः सुगन्धः सुन्दर्याः कन्यायाः आगच्छत् ।
7. यत्र यत्र सा नारी अगच्छत् तत्र तत्र सुगन्धः आसीत् ।
8. कन्याम् दृष्ट्वा का त्वम् इति शान्तनुः अपृच्छत् ।
9. कन्या अवदत् अहम् सत्यवती नाम ।
10. मम जनकः धीवराणाम् नृपः अस्ति इति ॥

Story 3: Bhīṣma's Vow

1. धीवराणाम् नृपम् गत्वा शान्तनुः वदति स्म ।
2. तव कन्याम् विवाहे इच्छामि इति ।
3. धीवराणाम् नृपः प्रतिवदति स्म यदि सत्यवती तव भार्या भविष्यति तर्हि तस्याः पुत्रः नृपः भविष्यति इति ।
4. शान्तनुः राजगृहम् दुःखेन पुनः अगच्छत् ।
5. भीष्मः सर्वम् श्रुत्वा धीवराणाम् नृपम् गत्वा तम् वदति स्म ।
6. पुरा शान्तनुः माम् अवदत् हे भीष्म त्वम् नृपः भविष्यसि इति ।
7. इदानीम् तु सत्यवत्याः पुत्रः नृपः भविष्यति ।
8. अहम् नृपः न भविष्यामि इति मम व्रतम् इति ।
9. शान्तनुः सत्यवतीम् परिणयति स्म ॥

Story 4: A Deer Curses Pāṇḍu

1. यस्मात् धृतराष्ट्रः अन्धः तस्मात् पाण्डुः नृपः अभवत् ।
2. पाण्डुः अचिन्तयत् का मम भार्या भविष्यति इति ।
3. सः कुन्त्याः स्वयंवरम् अगच्छत् ।
4. पाण्डुः कुन्त्या वृतः ।
5. भीष्मः पाण्डवे द्वितीयाम् भार्याम् अलभत ।
6. सा माद्री नाम ।
7. विवाहम् कृत्वा पाण्डुः भार्याभ्याम् सह वनम् अगच्छत् ।
8. तत्र पाण्डुः मृगम् अनुधावति स्म ।
9. शरेण तुदितः मृगः शापम् अवदत् यदि त्वम् भार्याम् परिष्वजसे तर्हि मृतः भविष्यसि इति ॥

Story 5 : Paraśurāma Discovers Karṇa's Lie

1. कर्णः कुन्त्याः एव पुत्रः ।
2. सा तु तम् बालकम् अल्पायाम् नौकायाम् अत्यजत् ।
3. कर्णः सूतेन नद्याः रक्षितः सूतस्य पुत्रः अभवत् च ।
4. वीरः भूत्वा कर्णः परशुरामम् नाम गुरुम् अगच्छत् ।
5. क्षत्रियाः परशुरामाय न अरोचन्त ।
6. तस्मात् ब्राह्मणः अहम् इति कर्णः परशुरामम् अवदत् ।
7. शिष्यः भूत्वा कर्णः सर्वम् धनुःशास्त्रस्य ज्ञानम् गुरोः अलभत ।
8. एकदा तु परशुरामः कर्णस्य ऊरौ निद्राम् अकरोत् ।
9. कृमिः कर्णस्य ऊरुम् प्राविशत् ।
10. कर्णः तु न अक्रोशत् ।
11. बुद्ध्वा परशुरामः कृमिम् कर्णस्य ऊरौ अपश्यत् ।
12. त्वम् क्षत्रियः एव त्वम् न ब्राह्मणः इति परशुरामः कर्णम् अवदत् ॥

Story 6: Droṇa's Son Tries to Destroy The Child in Uttarā's Womb

1. द्रोणस्य पुत्रः द्रौपद्याः पुत्रान् व्यापादयत् ।

2. तस्मात् पाण्डवानाम् दुःखम् आसीत् ।

3. ते द्रोणस्य पुत्रम् अन्वधावन् ।

4. सः तु ऋषिम् व्यासम् रक्षार्थम् अगच्छत् शरम् उत्तरायाः गर्भम् प्रत्यक्षिपत् च ।

5. उत्तरायाः गर्भे अर्जुनस्य प्रपुत्रः आसीत् ।

6. कृष्णेन तु शरः दृष्टः उत्तरा रक्षिता च ।

7. एवम् अर्जुनस्य प्रपुत्रः न हतः ।

8. पाण्डवाः द्रोणस्य पुत्रम् अजयन् ।

9. तस्य ललाटे मणिः आसीत् ।

10. द्रोणस्य पुत्रः भीमाय मणिम् अददात् ।

11. भीमः मणिम् द्रौपद्यै दत्त्वा द्रोणस्य पुत्रः मृतः इति ताम् अवदत्।

12. द्रौपद्याः दुःखम् तु न नष्टम् । (CONTINUED ON NEXT PAGE)

13. मम पुत्राः हताः इति सा पुनः पुनः अचिन्तयत् ।

14. तया मणिः युधिष्ठिराय दत्तः ॥

VERSE SET TEXT - The Bhagavad Gitā

The Bhagavad Gītā, which forms part of the great epic, the *Mahābhārata,* is one of the most famous and best-loved Sanskrit texts. Two armies, those of the Pāṇḍavas and the Kauravas, are on the battlefield preparing to fight. Arjuna, the champion of the Pāṇḍavas, is struck down with despair when he sees so many of his relatives and respected friends in the opposing army. He turns to his cousin and chariot driver, Kṛṣṇa, for advice. The Bhagavad Gītā is the conversation that then follows between Arjuna and Kṛṣṇa.

[Note to teacher: This passage, and the other set texts in this series of books, need to be thoroughly prepared by the students with your help.]

PRESENTATION:

- The verse is given first in *sandhi* in the original form, followed by each word out of *sandhi* then an English translation
- There are many possible English translations – those appearing here are one version only
- There are also several published translations which give help with the detailed grammar
- Each verse is followed by a gloss of the more difficult words
- Compound words: TP = *tatpuruṣa* BV = *bahuvrīhi* DV = *dvandva* AV = *avyayībhāva*

Chapter	Verse
1	14, 39
3	43
4	38
5	20, 25
6	29, 30
8	18, 22
10	5, 11, 33
12	12
13	13, 17, 22
17	15, 16
18	47

Chapter 1 v 14

सञ्जय उवाच ।

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।

माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥१॥१४॥

ततः । श्वेतैः । हयैः । युक्ते । महति । स्यन्दने । स्थितौ ।

माधवः । पाण्डवः । च । एव । दिव्यौ । शङ्खौ । प्रदध्मतुः ॥

sañjaya uvāca

tataḥ śvetair hayair yukte mahati syandane sthitau,

mādhavaḥ pāṇḍavaś caiva divyau śaṅkhau pradadhmatuḥ.

(Sañjaya said:)

1.14. Then, seated as the Mādhava and Pāṇḍava were in their magnificent chariot yoked to white steeds, they gracefully blew their divine conches.

श्वेतैः	(m. inst. pl.), with white, by white
हयैः	(m. inst. pl.), with horses, by horses
युक्ते	(m. loc. sq. p. pass. participle √yuj), yoked, joined, in yoke
महति	(m. loc. sg.), in the great, in the mighty
स्यन्दने	(m. loc. sg.), in the “fast-running”, in the chariot
स्थितौ	(m. nom. dual,) standing, situated
माधवः	(m. nom. sg.), descendant of Madhu
दिव्यौ	(m. acc. dual), the two divine, the two heavenly
शङ्खौ	(m. acc. dual), the two conch horns
प्रदध्मतुः	(3rd dual perfect act. pra√dhmā), they two blew forth

अर्जुन उवाच ।

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।

कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥१॥३९॥

कथम् । न । ज्ञेयम् । अस्माभिः । पापात् । अस्मात् । निवर्तितुम् ।

कुल-क्षय-कृतम् । दोषम् । प्रपश्यद्भिः । जनार्दन ॥

arjuna uvāca

kathaṃ na jñeyam asmābhiḥ pāpād asmān nivartitum,

kulakṣayakṛtaṃ doṣaṃ prapaśyadbhir janārdana.

(Arjuna said:)

1.39. Why should we not learn to recoil from such a sin, O Janardana, we who see evil in the destruction of family?

कथम्	how?
ज्ञेयम्	(gerundive √jñā), to be known, to be understood
अस्माभिः	(m. inst. pl), by us, with us
पापात्	(n. abl. sg.), from evil, from wrong
अस्मात्	(n. abl. sg.), from this
निवर्तितुम्	(infinitive ni √vṛt), to turn back
कुल-क्षय- कृतम्	(m. acc. sg. TP cpd.), caused destruction of family
दोषम्	(m. acc. sg.), evil, wrong
प्रपश्यद्भिः	(m. inst. pl. pr. participle pra √paś), by discerning, by discernment
जनार्दन	(m. voc. sg.), Agitator of Men, Mover of Men, epithet of Vishnu-Krishna

श्री भगवान् उवाच ।

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।

जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥३॥४३॥

एवम् । बुद्धेः । परम् । बुद्ध्वा । संस्तभ्य । आत्मानम् । आत्मना ।

जहि । शत्रुम् । महाबाहो । कामरूपम् । दुरासदम् ॥

śrī bhagavān uvaca - evaṃ buddheḥ paraṃ buddhvā saṃstabhyātmānam ātmanā,

jahi śatruṃ mahābāho kāmarūpaṃ durāsadam.

(The blessed Lord said:)

3.43. Thus knowing That as superior to the intellect, restraining the self by the Self, slay, O mighty-armed, the enemy in the form of desire, difficult to overcome.

एवम्	thus, even so
बुद्धेः	(f. abl. sg.), from the intelligence, than the intelligence
परम्	(m.acc. sg.), higher
बुद्ध्वा	(gerund √budh), having learned
संस्तभ्य	(gerund sam √stabh), having restrained
आत्मानम्	(m. acc. sg.), self
आत्मना	(m. inst. sg.) by the self
जहि	(2nd sg. imperative act. √han), kill! destroy!
शत्रुम्	(m. acc. sg.), enemy, adversary
महाबाहो	(m. voc. sg.), O mighty Armed One, epithet of Arjuna and other warriors.
कामरूपम्	(m. acc. sg. as BV cpd.), which has the form of desire
दुरासदम्	(m. acc. sg.), difficult to approach, encountered with difficulty

Chapter 4 v 38

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥४॥३८॥

न । हि । ज्ञानेन । सदृशम् । पवित्रम् । इह । विध्यते ।

तत् । स्वयम् । योग-संसिद्धः । कालेन । आत्मनि । विन्दति ॥

na hi jñanena sadṛśaṃ pavitram iha vidhyate,

tat svayaṃ yogasaṃ siddhaḥ kālenātmani vindati.

4.38. Verily there is no purifier in this world like knowledge. One who is perfected in yoga realises it in their own heart in due time.

हि	indeed
ज्ञानेन	(n. inst. sg.), by knowledge, to knowledge
सदृशम्	(n. nom. sg.), similar, equal
पवित्रम्	(n. nom. sg.), purifier, cleanser
इह	here, here in the world
विद्यते	(3rd sg. pr. indic. passive √2 vid), it is found
स्वयम्	(adv.), himself, own, self
योग-संसिद्धः	(m. nom. sg. TP cpd.), perfected in yoga
कालेन	(m. inst. sg.) by time, with time, in time
आत्मनि	(m. loc. sg.) in the self/heart
विन्दति	(3rd sg. pr. indic. acc. √2 vid), he finds, one finds

Chapter 5 v 20

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।

स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥५॥२०॥

न । प्रहृष्येत् । प्रियम् । प्राप्य । न । उद्विजेत् । प्राप्य । च । अप्रियम् ।

स्थिर-बुद्धिः । असंमूढः । ब्रह्मवित् । ब्रह्मणि । स्थितः ॥

na prahṛṣyet priyaṃ prāpya nodvijet prāpya cāpriyam,

sthirabuddhir asaṃmūḍho brahmavid brahmaṇi sthitaḥ.

5.20. Established in Brahman, with firm understanding and with no delusion, the knower of Brahman rejoices not, getting what is pleasant and grieves not, getting what is unpleasant.

प्रहृष्येत्	(3rd sg. optative act. pra√hṛṣ), one should rejoice, one should be excited
प्रियम्	(n. acc. sg.), the cherished, the dear, the preferred.
प्राप्य	(gerund pra√āp), attaining, reaching.
उद्विजेत्	(3rd sg. opt. act. ud √vij), one should shudder, one should tremble
अप्रियम्	(n. acc. sg.), uncherished, undesired, non-dear
स्थिरबुद्धिर्	(f. nom. sg. BV cpd.), firm intelligence
असंमूढो	(m. nom. sg. p. pass. participle a sam √muh), undeluded, unconfused
ब्रह्मवित्	(m. nom. sg.), Brahman knowing, a knower of Brahman
ब्रह्मणि	(n. loc. sg.), in Brahman
स्थितः	(m. nom. sg.), established, abiding, situated

Chapter 5 v 25

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।

छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥५॥२५॥

लभन्ते । ब्रह्म-निर्वाणम् । ऋषयः । क्षीण-कल्मषाः ।

छिन्न-द्वैधाः । यत-आत्मानः । सर्व-भूत-हिते । रताः ॥

labhante brahmanirvāṇam ṛṣayaḥ kṣīṇakalmaṣāḥ,

chinadvaidhā yatātmānaḥ sarvabhūtahite ratāḥ.

5.25. With sins destroyed, doubts (dualities) removed, minds disciplined, being delighted in the welfare of all beings, the Rishis attain the Beatitude of Brahman

लभन्ते	(3rd pl. pr. indic. mid. √labh), they attain, they acquire, they obtain
ब्रह्मनिर्वाणम्	(n. acc. sg. TP), the nirvāṇa of Brahman, the extinction of the self in Brahman
ऋषयः	(m. nom. pl.), the ṛṣis, the seers
क्षीण-कल्मषाः	(m. nom. pl. BV cpd.), whose evils are diminished
छिन्न-द्वैधाः	(m. nom. pl. BV cpd.), whos doubts are dispelled
यत-आत्मानः	(m. nom. pl. BV cpd.), whose selves are restrained
सर्व-भूत-हिते	(m. loc. sg. TP), in the welfare of all beings
रताः	(m. nom. pl. p. pass. participle √ram), delighted, content, rejoicing

Chapter 6 v 29

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।

ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥६॥२९॥

सर्व-भूत-स्थम् । आत्मानम् । सर्व-भूतानि । च । आत्मनि ।

ईक्षते । योग-युक्त-आत्मा । सर्वत्र । समदर्शनः ॥

sarvabhūtastham ātmānaṃ sarvabhūtāni cātmani,

īkṣate yogayuktātmā sarvatra samadarśanaḥ.

6.29. With mind harmonised by yoga, one sees oneself in all beings and all beings in oneself; one sees the same in all.

सर्व-भूत-स्थम्	(n. acc. sg.), existing in all beings, present in all beings
आत्मानम्	(m. acc. sg.), self
सर्व-भूतानि	(n. acc. pl.), all beings, all creatures
आत्मनि	(m. loc. sg.), in the self
ईक्षते	(3rd sg. pr. indic. mid. √īkṣ), he sees, he observes
योग-युक्त-आत्मा	(m. nom. sg. BV cpd.), whose self is diciplined in Yoga
समदर्शनः	(m. nom. sg.), seeing the same, seeing equally

Chapter 6 v 30

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।

तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥६॥३०॥

यो । माम् । पश्यति । सर्वत्र । सर्वम् । च । मयि । पश्यति ।

तस्य । अहम् । न । प्रणश्यामि । सः । च । मे । न । प्रणश्यति॥

yo māṃ paśyati sarvatra sarvaṃ ca mayi paśyati,

tasyāhaṃ na praṇaśyāmi sa ca me na praṇaśyati.

6.30. The one who sees Me everywhere and sees all things in Me, never becomes lost to Me, nor do I become lost to them.

यो	(m. nom. sg.), who
पश्यति	(3rd sg. pr. indic. act. √paś), one sees, observes, perceives
सर्वत्र	everywhere, at all times, in everything
मयि	(m. loc. sg.), in me
तस्य	(m. gen. sg.), of him/that one, to him/that one
प्रणश्यामि	(1st sg. pr. indic. act. pra √naś), I am lost
मे	(gen. sg.), of me, to me
प्रणश्यति	(3rd sg. pr. indic. act. pra√naś), one is lost, one is destroyed

Chapter 8 v 18

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।

रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥८॥१८॥

अव्यक्तात् । व्यक्तयः । सर्वाः । प्रभवन्ति । अहरागमे ।

रात्र्यागमे । प्रलीयन्ते । तत्र । एव । अव्यक्त-संज्ञके ॥

avyaktād vyaktayaḥ sarvāḥ prabhavanty aharāgame,

rātryāgame pralīyante tatraivāvyaktasaṃjñake.

8.18. At the coming of day all manifest beings proceed from the unmanifested, and at the coming of night they merge again in the same which is called the unmanifested.

अव्यक्तात्	(m. abl. sg.), from the unmanifest, from the invisible
व्यक्तयः	(f. nom. pl), manifestations, appearances
प्रभवन्ति	(3rd pl. pr. indic. act. pra√bhū), they come forth, they originate
अहरागमे	(m. loc. sg.), at the arrival of day
रात्र्यागमे	(m. loc. sg.), at the arrival of night
प्रलीयन्ते	(3rd pl. pr. indic. pass. pra √lī), they are dissolved, they are reabsorbed, they disappear
अव्यक्त-संज्ञके	(m. loc. sg. BV cpd.), whose name is the unmanifest

Chapter 8 v 22

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।

यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥८॥२२॥

पुरुषः । सः । परः । पार्थ । भक्त्या । लभ्यः । तु । अनन्यया ।

यस्य । अन्तःस्थानि । भूतानि । येन । सर्वम् । इदम् । ततम् ॥

puruṣaḥ sa paraḥ pārtha bhaktyā labhyas tv ananyayā,

yasyāntaḥsthāni bhūtāni yena sarvam idaṃ tatam.

8.22. That Supreme Puruṣa, O Partha, is attainable by unswerving devotion to That alone within whom all beings dwell, by whom all this is pervaded.

पुरुषः	(m. nom. sg.), spirit, Self
परः	(m. nom. sg.), highest, supreme
पार्थ	(m. voc. sg.), Son of Pṛthā, epithet of Arjuna referring to his mother Kuntī or Pṛthā
भक्त्या	(f. inst. sg.), by devotion, by worship
लभ्यः	(m. nom. sg. gerundive √labh), to be attained, attainable
तु	but, indeed
अनन्यया	(f. inst. sg.), not by it directed elsewhere
अन्तःस्थानि	(n. nom. pl.) standing within, existing within
भूतानि	(n. nom. pl.), beings, all beings
येन	(m. inst. sg.), by which
सर्वम् इदं	(n. nom. sg.), all this, all this universe
ततम्	(n. nom. p. pass. participle √tan), stretched pervaded

Chapter 10 v 5

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।

भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ १०॥ ५॥

अहिंसा । समता । तुष्टिः । तपः । दानम् । यशः । अयशः ।

भवन्ति । भावाः । भूतानाम् । मत्तः । एव । पृथग्विधाः ॥

ahiṁsā samatā tuṣṭis tapo dānaṃ yaśo'yaśaḥ,

bhavanti bhāvā bhūtānāṃ matta eva pṛthagvidhāḥ.

10.5. Non-injury, equanimity, contentment, austerity, charity, fame and ill-fame – these different qualities of beings arise from Me alone.

अहिंसा	(f. nom. sg.), non-violence, harmlessness
समता	(f. nom. sg.), impartiality, equableness
तुष्टिः	(f. nom. sg.), contentment, satisfaction
तपः	(n. nom. sg.), austerity, heat
दानम्	(m. nom. sg.), charity, benevolence, gift
यशः	(m. nom. sg. here m.), fame, celebrity, good name
अयशः	(m. nom. sg. here m.), disrepute, bad reputation
भवन्ति	(3rd pl. pr. indic. act. √bhū), they are, they arise, they come to be
भावाः	(m. nom. pl.), conditions, states of being, qualities
भूतानाम्	(m. gen. pl.), of beings, of creatures
मत्तः	(abl. sg.), from me
पृथग्विधाः	(m. nom. pl.), manifold, existing in many forms, placed many times, of many varieties

Chapter 10 v 11

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥१०॥११॥

तेषाम् । एव । अनुकम्प-अर्थम् । अहम् । अज्ञान-जम् । तमः ।

नाशयामि । आत्म-भाव-स्थः । ज्ञान-दीपेन । भास्वता ॥

teṣām evānukampārtham aham ajñānajaṃ tamaḥ,

nāśayāmy ātmabhāvastho jñānadīpena bhāsvatā.

10.11. Out of compassion for them, dwelling in their hearts, I destroy the ignorance-born darkness, by the luminous lamp of wisdom.

तेषाम्	(m. gen. pl.), of then
अनुकम्प-अर्थम्	(m. acc. sg.), out of compassion
अज्ञान-जम्	(n. acc. sg.), ignorance-born, produced by ignorance
तमः	(n. acc. sg), darkness, murk, guṇa of tamas
नाशयामि	(1st causative pr. indic. √naś), I cause to be destroyed, I cause to be lost
आत्म-भाव-स्थः	(m. nom. sg.), situated in own being, dwelling in own being
ज्ञान-दीपेन	(m. inst. sg.), by the lamp of knowledge, with the lantern of knowledge
भास्वता	(m. inst. sg.), shining, luminous, bright

Chapter 10 v 33

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।

अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥१०॥३३॥

अक्षराणाम् । अकारः । अस्मि । द्वन्द्वः । सामासिकस्य । च ।

अहम् । एव । अक्षयः । कालः । धाता । अहम् । विश्वतोमुखः ॥

akṣarāṇām akāro 'smi dvandvaḥ sāmāsikasya ca,

aham evākṣayaḥ kālo dhātāhaṃ viśvatomukhaḥ.

10.33. Of letters, I am the letter A, and of word-compounds I am the dual (Dvandva). I am verily the inexhaustible Time. I am the Dispenser facing everywhere.

अक्षराणाम्	(m. gen. pl.), of letters of the alphabet, lit. “indestructibles” or “irreducibles”
अकारः	(m. nom. sg.), letter A
अस्मि	(1st sg. pr. indic. √as), I am
द्वन्द्वः	(m. nom. sg.), simple copulative compound (consisting of two or more words)
सामासिकस्य	(m. gen. sg.), of the system of compounds
अक्षयः	(m. nom. sg.), infinite, imperishable, indestructable
कालः	(m. nom. sg.), time
धाता	(m. nom. sg.), establisher, arranger
विश्वतोमुखः	(m. nom. sg.), facing in all directions, omniscient

Chapter 12 v 12

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।

ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२॥१२॥

श्रेयस् । हि । ज्ञानम् । अभ्यासात् । ज्ञानात् । ध्यानम् । विशिष्यते ।

ध्यानात् । कर्म-फल-त्यागः । त्यागात् । शान्तिः । अनन्तरम् ॥

śreyo hi jñānam abhyāsāj jñānād dhyānaṃ viśiṣyate,

dhyānāt karmaphalatyāgas tyāgāc chāntir anantaram.

12.12. Better indeed is knowledge than (formal) Abhyasa; better than knowledge is meditation; better than meditation is the renunciation of the fruit of action; peace immediately follows renunciation.

श्रेयस्	(m. nom. sg.), better, more fortunate, more valuable
हि	indeed, truly
ज्ञानम्	(n. nom. sg.), knowledge
अभ्यासात्	(m. abl. sg.), from practice, than practice
ज्ञानात्	(n. abl. sg.), from knowledge, than knowledge
ध्यानम्	(n. nom. sg.), meditation
विशिष्यते	(3rd sg. passive vi √śiṣ), it is preferred, it is superior
ध्यानात्	(n. abl. sg.), from meditation, than meditation
कर्म-फल-त्यागः	(m. nom. sg.), abandonment of the fruit of action
त्यागात्	(m. abl. sg.), from abandonment
शान्तिः	(f. nom. sg.), peace, tranquility
अनन्तरम्	(adv.), immediately, soon

Chapter 13 v 13

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।

सर्वतःश्रुतिमल्लोके सर्वम् आवृत्य तिष्ठति ॥१३॥१३॥

सर्वतः । पाणि-पादम् । तत् । सर्वतः । अक्षि-शिरम्-मुखम् ।

सर्वतः । श्रुतिमत् । लोके । सर्वम् । आवृत्य । तिष्ठति ॥

sarvataḥ pāṇipādaṃ tat sarvato 'kṣiśiromukham,

sarvataḥ śrutimal loke sarvam āvṛtya tiṣṭhati.

13.13. With hands and feet everywhere, with eyes and hands and mouths everywhere, with ears everywhere – It exists enveloping all.

सर्वतः	(adv.), everywhere
पाणि- पादं	(n. nom. sg. BV cpd.), having a hand and foot
अक्षि- शिरो- मुखम्	(n. nom. sg. BV cpd.), having an eye, head and face
श्रुतिमत्	(n. nom. sg.), having ears, having hearing
लोके	(m. loc. sg.), in the world, on Earth
आवृत्य	(gerund ā √vṛ), enveloping, covering, spreading, pervading
तिष्ठति	(3rd sg. pr. indic. act. √sthā), it stands, it is present, it remains

Chapter 13 v 17

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।

ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥१३॥१७॥

ज्योतिषाम् । अपि । तत् । ज्योतिस् । तमसः । परम् । उच्यते ।

ज्ञानम् । ज्ञेयम् । ज्ञान-गम्यम् । हृदि । सर्वस्य । विष्ठितम् ॥

jyotiṣām api taj jyotis tamasaḥ param ucyate,

jñānaṃ jñeyaṃ jñānagamyaṃ hṛdi sarvasya viṣṭhitam.

13.17. The light of all lights, It is said to be beyond darkness; knowledge, the knowable, the goal of knowledge, seated in the hearts of all.

ज्योतिषाम्	(n. gen. pl.), of lights, of stars
अपि	also, even
ज्योतिस्	(n. nom. sg.), light
तमसः	(n. abl. sg.), of darkness
परम्	(n. nom. sg.), beyond
उच्यते	(3rd sg. pr. indic. passive √vac) it is said
ज्ञानम्	(n. nom. sg.), knowledge, wisdom
ज्ञेयम्	(n. nom. sg. gerundive √jñã), the to-be-known, the object of knowledge
ज्ञान-गम्यम्	(n. nom. sg.), goal of knowledge, the attainable through knowledge
हृदि	(n. loc. sg.), in the heart
सर्वस्य	(m. gen. sg.), of all
विष्ठितम्	(n. nom. sg. p. pass. participle vi √sthā), seated, situated

Chapter 13 v 22

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।

परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥१३॥२२॥

उपद्रष्टा । अनुमन्ता । च । भर्ता । भोक्ता । महेश्वरः ।

परमात्मा । इति । च । अपि । उक्तः । देहे । अस्मिन् । पुरुषः ।परः॥

upadraṣṭānumantā ca bhartā bhoktā maheśvaraḥ,

paramātmeti cāpy ukto dehe 'smin puruṣaḥ paraḥ.

13.22. The Supreme Puruṣa in this body is also called the Spectator, the One who permits, the Supporter, the One who experiences, the Great Lord and the Supreme Self.

उपद्रष्टा	(m. nom. sg.), witness, observer
अनुमन्ता	(m. nom. sg.), consenter, permitter, approver
भर्ता	(m. nom. sg.), supporter, bearer
भोक्ता	(m. nom. sg.), experiencer, enjoyer
महेश्वरः	(m. nom. sg.), great lord
परम-आत्मा	(m. nom. sg.), Supreme Self
उक्तः	(m. nom. sg. p. pass. participle √vac), called, said to be
देहे	(m. loc. sg.), in the body
अस्मिन्	(m. loc. sg.), in this
पुरुषः	(m. nom. sg.), spirit
परः	(m. nom. sg.), highest

Chapter 17 v 15

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।

स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१७॥१५।

अनुद्वेग-करम् । वाक्यम् । सत्यम् । प्रिय-हितम् । च । यत् ।

स्वाध्याय । अभ्यसनम् । च । एव । वाङ्मयम् । तपः । उच्यते ॥

anudvegakaraṃ vākyaṃ satyaṃ priyahitaṃ ca yat,

svādhyāyābhyasanaṃ caiva vāṅmayaṃ tapa ucyate.

17.15. The speech which causes no excitement, which is truthful, pleasant and beneficial, and also the practice of sacred recitation – these are said to form the austerity of speech.

अनुद्वेग-करम्	(n. nom. sg.), not causing distress, not overawing, not causing apprehension
वाक्यम्	(n. nom. sg.), word, speech
सत्यम्	(n. nom. sg.), true, truthful
प्रिय-हितम्	(n. nom. sg. DV cpd.), agreeable and salutary
स्वाध्याय	(m.) speaking sacred texts to oneself, reciting sacred texts
अभ्यसनम्	(n. nom. sg.), practice, exercise
स्वाध्याय-अभ्यसनम्	(n. nom. sg. TP cpd.), practice of recitation
वाङ्मयम्	(vāc mayam, n. nom. sg.), speech-formed, speech-made
तपः	(n. nom. sg.), austerity, heat
उच्यते	(3rd sg. pr. indic. passive √vac), it is called, it is said to be

Chapter 17 v 16

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।

भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१७॥१६॥

मनः । प्रसादः । सौम्यत्वम् । मौनम् । आत्म-विनिग्रहः ।

भाव-संशुद्धिः । इति । एतत् । तपः । मानसम् । उच्यते ॥

manaḥprasādaḥ saumyatvaṃ maunam ātmavinigrahaḥ,

bhāvasaṃśuddhir ity etat tapo mānasam ucyate.

17.16. Serenity of mind, gentleness, silence, self-control and purity of disposition – this is called the mental austerity.

मनः- प्रसादः	(m. nom. sg.), peace of mind, clarity, calmness, kindness
सौम्यत्वम्	(n. nom. sg.), gentleness, benelovence. mildness
मौनम्	(n. nom. sg.), silence, taciturnity
आत्म-विनिग्रहः	(m. nom. sg.), self-restraint
भाव-संशुद्धिः	(f. nom. sg.), purity of being, cleanliness of being
एतत्	(n. nom. sg.), this
तपः	(n. nom. sg.), austerity, heat
मानसम्	(n. nom. sg.), mental, of the mind
उच्यते	(3rd sg. pr. indic. passive √vac), it is called, it is said to be

Chapter 18 v 47

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।

स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥१८॥४७॥

श्रेयान् । स्वधर्मः । विगुणः । पर-धर्मात् । स्वनुष्ठितात् ।

स्वभाव-नियतम् । कर्म । कुर्वन् । न । आप्नोति । किल्बिषम् ॥

śreyān svadharmo viguṇaḥ paradharmāt svanuṣṭhitāt,

svabhāvaniyataṃ karma kurvan nāpnoti kilbiṣam.

18.47. Better is one's own dharma, though imperfect, than the dharma of another well performed. One who does the duty ordained by his own nature incurs no sin.

श्रेयान्	(m. nom. sg. comparative), better, superior, preferable
स्वधर्मः	(m. nom. sg.), own duty, own caste duty
विगुणः	(m. nom. sg.), imperfect, lacking, wanting
पर-धर्मात्	(m. abl. sg.) than another's duty, than the duty of another caste
स्वनुष्ठितात्	(m. abl. sg. su anuṣṭhitāt), well done, well perforned, well executed
स्वभाव-नियतं	(n. acc. sg. TP cpd), prescribed by one's own nature
कर्म	(n. acc. sg.), action
कुर्वन्	(n. nom. sg. pr. act. participle √kṛ) performing, doing
आप्नोति	(3rd sg. pr. indic. act. √āp), one incurs, obtains, attains
किल्बिषम्	(n. acc. sg.), guilt, fault, sin, evil

Six prose selections from 'Pañcatantra of Viṣṇuśarman' published by Motilal Banarsidass Private Ltd., New Delhi, 2008.

Line Reference	Prose	Page
1 to 2	The weighing scales and the merchant's son (*asti kasmiṅścid adhiṣṭhāne... vyacintayat*)	88
7 to 16	The weighing scales and the merchant's son (*tasya gṛhe ... snānopakaraṇam ādāya iti*)	88
21 to 28 1	The weighing scales and the merchant's son (*athāsau ... dārakeṇa*) (*prayojanam*)	88 89
28 to 30	The lion, the jackal, and the cave (*kasmiṅścid vanodeśe... nūnam etasyāṃ*)	168
1 to 19	The lion, the jackal, and the cave (*guhāyāṃ rātrau... me śrutā*)	169
7 to 23	The snake and the frogs (*skandhenāpi ... vāhanārtham āgato'smi*)	173

The following texts have been divided in some places to help to show individual words, but only taken out of sandhi in exceptional cases. The original texts are shown in the Appendix at the end of this booklet.

Help is also given with some compounds (*samāsas*). See the note next to the translation underneath the Sanskrit word.

TP = *tatpuruṣa* KD = *karmadhāraya* DV = *dvandva* BV = *bahuvrīhi* AVB = *avyayībhāva*

The Weighing Scales and the Merchant's son

अस्ति कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः । स च

there was	in a certain	in an abode/town	Jīrṇadhana	by name	businessman's son TP 6th	he	and

There was, in a certain town, a businessman's son named Jīrṇadhana. Owing to

विभव-क्षयाद् देशान्तर-गमन-मना व्यचिन्तयत् –

owing to a loss of wealth TP 6th	minded to journey to another country BV	he thought

a loss of wealth, he thought about going to another country.

तस्य गृहे लोह-भार-घटिता पूर्व-पुरुष-उपाजिता तुला अस्ति।

his	in house	made of a heavy mass of iron TP 5/6th	produced by his ancestors TP 3rd	a balance	there was

In his house there was a weighing scale that his ancestors had got made from solid iron.

तां च कस्यचित् श्रेष्टिनो गृहे निक्षेप-भूतां कृत्वा देशान्तरं प्रस्थितः ।

that (f. 2nd)	and	of a certain	of a money-lender	in house	a deposit (pawned) (f. 2nd) KD	having made	to another country KD	he set out

Having made that as a deposit in the house of a money-lender, he set out to foreign lands.

ततः सुचिरं कालं देशान्तरं भ्रान्त्वा पुनः स्वपुरम् आगत्य तं श्रेष्टिनम् उवाच

after that	a long time (2nd)	other country/places KD	having roamed about	again	his own city	having returned	to that moneylender	he said

After that, having roamed about the other places for a long time, and having returned to his hometown again, he said to that money lender,

-- भोः श्रेष्टिन् दीयतां मे सा निक्षेप-तुला । स आह - भो न अस्ति सा त्वदीया

O respected	money-lender	please give	me	the	pawned scales KD	He said	O respected	do not exist	that (f.)	your

"O Respected Sir, please give me the scales that were deposited/pawned". He said,

"O Sir, your scales do not exist.

तुला । मूषिकैः भक्षिता । जीर्णधन आह -- भोः श्रेष्टिन् नास्ति दोषस्ते, यदि

scales	by mice	it has been eaten	Jīrṇadhana	said	O respected	money-lender	it is not	fault	your	if

They have been eaten by mice." Jīrṇadhana said -- "O Respected money-lender, it's not your fault, if they have been eaten by mice."

मूषिकैर् भक्षिता इति । by mice / it has been eaten / speech marks

ईदृग् एव अयं संसारः । न किञ्चिद् अत्र शाश्वतमस्ति ।

such indeed (is) this world nothing here is permanent

"This world is such. Nothing here is permanent.

परम् अहं नद्यां स्नान-अर्थं गमिष्यामि । तत् त्वम् आत्मीयं शिशुमेतं

beyond/ later | I | in the river | for a bath TP 4th | I will go | So | you | one's/your own | son | him/ this

Later I am going for a bath in the river. So send your own son, this one

धनदेवनामानं मया सह स्नान-उपकरण-हस्तं प्रेषय इति । सोऽपि चौर्यभयात्

named Dhanadeva (2nd) | tog with me | bathing accessories (towel etc) in hand BV | send! | " " | he also/even | from fear of trickery TP 5/6

named Dhanadeva, with me, with bathing accessories in hand." The money-lender, apprehensive

तस्य शङ्कितः स्वपुत्रमुवाच -- वत्स पितृव्योऽयं तव स्नानार्थं नद्यां यास्यति ।

his | apprehensive | said to his son | O Son! | this uncle | of yours | for a bath | will go in the river

from fear of trickery, said to his son, - "O Son! This uncle of your is going for a bath in the river.

तद्गम्यताम् अनेन सार्धं स्नानोपकरणम् आदाय इति ।

Then go! | together with him | the bathing accessories TP 4th | taking | " "

Then go, together with him, taking the bathing paraphernalia"

अथ असौ वणिक्शिशुः स्नानोपकरणमादाय प्रहृष्ट-मनाः तेन अभ्यागतेन सह

Then he | the young boy/child of the merchant TP 6 | taking the bathing accessories | having a cheerful face BV | with that one who had come/arrived (the visitor)

Then, the money-lender's child, with cheerful face, taking the bathing accessories, set out with that

प्रस्थितः । तथा अनुष्ठिते वणिक् स्नात्वा तं शिशुं नदी-गुहायां प्रक्षिप्य,

he set out | just as/so | it was done (when) | the merchant | having bathed | that boy (2nd) | in a cave in the river (bank) TP 7th | having put/hidden

person who had arrived. When matters had happened accordingly, the merchant, after bathing,

तद्-द्वारं बृहत्-शिलया अच्छाद्य सत्वरं गृहमागतः । पृष्टश्च तेन वणिजा

the door of it TP 6th | with a great stone KD | having shut the entrance | quickly | went home | And he was asked | by that money-lender

having hidden that boy in a cave in the riverbank, having shut the entrance door with a large stone, quickly returned home. And he was asked by that money-lender,

- भो अभ्यागत कथ्यतां कुत्र मे शिशुर् यः त्वया सह नदीं गतः इति ।

O visitor! | tell (imp) | where? (is) | my son | who | with you | to the river | went | " "

"O visitor, tell me, where is my son who went with you to the river?"

स आह -- नदी-तटात् स श्येनेन हृतः इति । श्रेष्ठी आह -- मिथ्य-वादिन्

He said	from the bank of the river TP 6th	he	by the falcon	was carried away	" "	the money lender	said	O speaker of falsity/lies TP

He said, "He was carried away from the riverbank by a falcon." The money-lender said, "O liar

किं क्वचित् श्येनः बालं हर्तुं शक्णति । तद् समर्पय मे सुतम् ।

What?	somewhere	a falcon	a young boy (2nd)	is able to carry off	Then	hand over!! (imp)	my son

"What? A falcon is able to carry off a child somewhere?" "Then, hand over my son!"

अन्यथा राज-कुले निवेदियिष्यामि इति । स आह -- भोः सत्यवादिन्

Otherwise	in the company/court of the king TP 6th	I will inform	" "	He said	O truth-speaker

"Otherwise I will inform in the court of the king." He said, "O truth-speaker

यथा श्येनो बालं न नयति तथा मूषिका अपि लोह-भार-घटितां तुलां

just as	a falcon	a young boy (2nd)	does not bring	so	mice	also	made of a mass of iron (2nd)	scales/a balance (2nd)

"Just as a falcon does not bring a young boy, so also mice do not eat scales made of solid iron!

न भक्षयन्ति, तदर्पय मे तुलां, यदि दारकेण प्रयोजनम् ।

they do not eat	then ...hand over (imp)	my scales	if	by/with your child	your purpose/aim (is)

Hand over my scales, then, if your intention is to be reunited with your child."

कस्मिंश्चिद् वनोद्देशे खरनखगे नाम सिंहः प्रतिवसति स्म । स

in a certain	in a place in the forest TP 7th	Kharanakhara	by name	lion	lived	He

In a certain place in a forest lived a lion named Kharanakhara. One day at a certain time,

कदाचिद् इतश्चेतश्च परिभ्रमन् क्षुत्-क्षाम-कण्ठो न किं चिदपि सत्त्वम् आसमाद ।

some time	here &	there &	wandering	sore	-dried up KD	-throat	not any	animal	he found

wandering here and there, his throat dried up and sore, he could not find any animal at all [for food].

ततः च अस्तमन-समये महतीं गिरि-गुहाम् आसाद्य प्रविष्टश् चिन्तयामास - -

And after that	-of sunset	at the moment TP 6th	a large	mountain cave	finding	he entered	he thought

And after that, at the moment of sunset, finding a large mountain cave he entered, (and) thought

नूनम् एतस्यां गुहायां रात्रौ केनापि सत्त्वेन आगन्तव्यम् । तन्निभृतो भूत्वा

certainly/ assuredly	in this	in cave	in the night	by some animal	it should be come	he, settled/ hidden in that TP 7th	having become

"Certainly/surely, some animal should come into this cave during the night." "Having become settled/hidden in that/there,

तिष्ठामि । एतस्मिन् अन्तरे तत्स्वामी दधिपुच्छो नाम शृगालः समायातः ।

I remain	in this	in inside/ interior	the owner of that TP 6th/BV	Dadhipuccha	named	a jackal	came near/ returned

I will wait." The owner/resident, a jackal named Dadhipuccha, came into this interior.

स च यावत्पश्यति तावत् सिंह-पद-पद्धतिर् गुहायां प्रविष्टा न च निष्क्रान्ता * ।

He	and	as far as	he sees	for that long the paw marks of the lion TP 6th	in cave	entered	but not	gone out (f)

And he sees/saw the paw marks of a lion entered as far as the inside of the cave but not at any stage gone out.

ततश्च अचिन्तयत् - - अहो विनष्टोऽस्मि । नूनम् अस्याम् अन्तर् गतेन सिंहेन

after that	&	he thought	"O	I am destroyed!"	Surely	in this	interior	by gone	by lion

After that he thought "Alas! I am destroyed!" Surely, a lion must have gone into the inside."

भाव्यम् । तत्किं करोमि । कथं ज्ञास्यामि । एवं विचिन्त्य द्वार-स्थः

it must be perceived	what	shall I do?	How	will I know?	Thus	thinking reflecting	stood at the entrance

"What shall I do?" "How will I know?" Thinking in such a manner, standing at the entrance,

फूत्कर्तुम् आरब्धः - अहो बिल अहो बिल इत्युक्त्वा तूष्णींभूय भूयोऽपि तथैव

to shriek | he began | O | cave | O | cave | thus having spoken | becoming silent | again | like-wise

he began to shriek "O cave! O cave!" Having spoken thus, becoming silent again, in a similar way

प्रत्यभाषत - भोः किं न स्मरसि यन्मया त्वया सह समयः कृतोऽस्ति ।

he spoke back | O | what? | not | you remember | what with me | with you | a pact | was made

he spoke back, "O sir! Do you not remember the pact/agreement between you and me?

यन्मया बाह्यात् समागतेन त्वं वक्तव्यः । त्वया च अहम् आकारणीय इति ।

what/ when | by me | from outside | by (me) returned | you | (you) should be called to | by you & | I | should be called to | " "

When I have returned from outside you should be called to. And I should be called to by you.

तद्यदि मां नाह्वयसि ततोऽहं द्वितीयं बिलं यास्यामि । अथ तच्छ्रुत्वा

then if | to me? | not | you call/ invite | then I | to a second cave | I will go | Then | having heard that

Then, if you do not invite me in, I will go to another cave. " Then, having heard that,

सिंहश् चिन्तितवान् -- नूनमेषा गुहा अस्य समागतस्य सदा समाह्वानं करोति ।

the lion | thought | surely | this | cave | of/for this one | of/for him returning | always | a summons | makes

the lion thought – Surely this cave always makes a calling for this one returning.

परम् अद्य मद्-भयान् न किं चिद् ब्रूते । अथवा साध्विदमुच्यते –

except-ionally | today | from fear of me TP th | nothing | he says | or | rightly | this | is said

Exceptionally today, he says nothing, from fear of me. Or, rightly this is said

भय-संत्रस्त-मनसां हस्त-पाद-अदिकाः क्रियाः ।

of those whose minds are agitated with terror/fear BV | hands, feet, etc BV | actions

"Actions of those whose minds are agitated with terror, such as of hands, feet, etc

प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ॥

they do not proceed | voice & | quivering | numerous | would become

do not proceed, and the voice would be quivering excessively."

तद् अहम् अस्या आह्वानं करोमि येन तद-अनुसारेण प्रविष्टोऽयं मे भोज्यतां यास्यति ।

Then | I | for him | a call | I will make | by which | that | due to/ following TP 2nd | entered | this one | he will go to/ become my meal

Then/thus I will make his call, and, by following that, this one will have entered and will become my meal.

एवं संप्रधार्य सिंहम् तस्य आह्वानम् अकरोत् । अथ सिंहशब्देन सा गुहा

Thus	having resolved	the lion	his	a roar	made	Then	by the sound of the lion TP 6th	that	cave

Having resolved thus, the lion made his roar. Then, that cave was completely filled by the sound of the lion,

प्रतिरव-संपूर्णा अन्यानपि दूरस्थान् अरण्य-जीवान् त्रासयामास । शृगालोऽपि

completely filled with the roar TP 3rd	other	also	far off	the creatures in forest TP 7th	he frightened	The jackal	also

(and) the roar even frightened other far away forest creatures. The jackal, also

पलायमान इमं श्लोकम् अपठत् -

running away	this	sloka	recited

running away, recited this verse:

अनागतं यः कुरुते स शोभते स शोच्यते यो न करोति अनागतम् ।

what has not yet come	he who	makes prepares	he	succeeds	he is grieved	who	does not make/ prepare	for what has not come

He who makes ready for what has not yet come, he succeeds; He who does not prepare for what has not happened, he is grief-stricken.

वनेऽत्र संस्थस्य समागता जरा बिलस्य वाणी न कदापि मे श्रुता ॥

here in the forest	for the one existing for a long time	has come	old age	of a cave	the voice	never	of me	is heard

Existing for a long time here in the forest, old age has arrived. [But] The voice of a cave has never been heard by me.

* निष्क्रमणं गता added in Kale footnote as alternative for निष्क्रान्ता

स्कन्धेन अपि वहेत् शत्रुं कालम् आसाद्य बुद्धिमान् ।

by shoulder	even also	he should carry	enemy	(at) proper time	having put down reaching	a wise person

Even a wise person should carry his enemy on his shoulder, putting him down at the right time.

महता कृष्ण-सर्पेण मण्डूका बहवो हताः ॥

by a great	black snake KD	frogs	many	(were) killed

[In such a way] Many frogs were killed by a large black snake.

मेघवर्ण आह – कथमेतत् । स्थिरजीवी कथयति --

Meghavarna (a crow)	said	how?	this	Sthirajīvī (crow)	tells (the story)

Meghavarṇa said, "How is this?" Sthirajīvī tells the story,

अस्ति वरूणाद्रि-समीपे एकस्मिन् प्रदेशे परिणतवया मन्दविषो नाम कृष्ण-सर्पः ।

there was	near the Varuṇādri mountain TP 6th	in a certain	region place	with maturity/ old age	Mandaviṣa	by name	a black snake KD

"There was in a certain region near the Varuṇādri mountain an old snake named Mandaviṣa.

स एवं चित्ते संचिन्तितवान् - - कथं नाम मया सुखोपाय-वृत्त्या वर्तितव्यमिति ।

He	thus	in reflecting	he thought	How?	certainly	by me	easy strategy	by the use of	to be lived/ existed

Reflecting, he thought in such a manner: "How, assuredly, can I live by my use of easy strategies?"

ततो बहु-मण्डूकं ह्रदम् उपगम्य धृति - परीतम् इव अत्मानं दर्शितवान् । अथ तथा

After that	having many frogs (BV)	a lake	having arrived at	standing still (&) moving around DV	as if	himself	he showed	Then, now	so, like this

After that, having arrived at a lake which contained many frogs, he showed himself as if moving around restlessly. Then, like so,

स्थितः स उदक-प्रान्त-गतेन एकेन मण्डूकेन पृष्टः - माम किमद्य यथा-पूर्वम् आहारार्थं

he stayed	he	water	to the edge of	who had gone TP2nd	by one frog	was asked	O Uncle	why?	today	as in the past AVB	for food TP 4th

he stayed. He was asked by one frog who had gone to the edge of the water, "O Uncle! Why do you not search for food today, as in the past?"

न विहरसि । सोऽब्रवीत् - - भद्र कुतो मे मन्द-भाग्यस्य आहार-अभिलाषः ।

you do not search	he	said	My dear!	where?	of/for me who has misfortune BV	desire for food TP 4th

He said, "My dear! Unfortunate that I am, where is the desire for food?".

यत्कारणम् अद्य रात्रौ प्रदोष एव मयाहार-अर्थं विहरमाणेन दृष्ट एको मण्डूकः ।

which	cause	to-day	at night	in the evening	indeed	by me	for food TP 4th	by hunting/ roaming about	it was seen	a certain	frog

The cause of this today [is as follows]. In the darkness of night indeed, a certain frog was seen due to my roaming about for food.

तद्ग्रहण-अर्थं मया क्रमः सज्जितः । सोऽपि मां दृष्ट्वा मृत्यु-भयेन स्वाध्याय-प्रसक्तानां

for the purpose of catching him TP 4th	by me	a step/ position	was prepared	he	also	me	having seen	with fear of death TP 5/6th	of those who were engaged in study TP 3rd	

A position was prepared by me for the purpose of catching him. He, also having seen me, through fear of death,

ब्राह्मणानाम् अन्तर्- अपक्रान्तो न विभावितो मया क्वापि गतः ।

of the Brahmins	in the middle	gone away/ retreated TP 7th	not	caused to appear	by me	some-where else	(he had) gone

retreated into the middle [of a group] of Brahmins who were engaged in study. He was not seen by me to appear again. He had gone somewhere else.

तत्-दृश्य-मोहित-चित्तेन मया कस्यचित् ब्राह्मणस्य सूनोः ह्रद-तट-जलान्तःस्थोऽङ्गष्ठो

him	likeness similar-ity	confused deluded	whose thinking BV	by me	of some		of Brahmin	of the child	lake on the bank	situated at the edge of the water TP 7th	thumb

By me, whose thinking was confused by the similarity to him, I bit the thumb of the child of some Brahmin situated at the edge of the water on the bank of the lake.

दष्टः । ततोऽसौ स-पदि पञ्चत्वम् उपागतः । अथ तस्य पित्रा दुःखितेनाहं शप्तो

[was] bitten	then	he	instantaneously AVB	died		then	his	by father	sorrow-fully	I was cursed

After that, he died instantaneously. Then I was cursed by his sorrowful father

यथा - - दुरात्मन् त्वया निरपराधो मत्सुतो दष्टः । तदनेन दोषेण त्वं मण्डूकानां

just as	villain!	by you	who was without sin	my son TP 6th	was bitten	then	due to this fault	you	of frogs

in this way – "O villain! My son, who was without sin, was bitten by you. Thus, due to this fault, you will become the vehicle of frogs!

वाहनं भविष्यसि । तत्-प्रसाद-लब्ध-जीविकया वर्तिष्यसे इति ।

the vehicle	you will become	of that	grace offering	found	by making a livelihood KD	you will exist

You will exist by making a livelihood, found through the grace of that."

ततोऽहं युष्माकं वाहन-अर्थम् आगतोऽस्मि ।

Thus	I	of you (pl)	for the purpose of the carrying TP 4th	I am come

Thus I am come for the purpose of carrying you.".

The weighing scales and the merchant's son (Kale p.88/9)

अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः ।

स च विभवक्षयाद्देशान्तरगमनमना व्यचिन्तयत्---

तस्य गृहे लोहभारघटिता पूर्वपुरूषोपार्जिता तुलासीत् । तां च कस्यचिच्छ्रेष्टिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः । ततः सुचिरं कालं देशान्तरं भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच --- भोः श्रेष्ठिन् दीयतां मे सा निक्षेपतुला । स आह--- भोः नास्ति सा त्वदीया तुला । मूषिकैर्भक्षिता । जीर्णधन आह--- भोः श्रेष्ठिन् नास्ति दोषस्ते यादि मूषिकैर् भक्षितेति । ईदृगेवायं संसारः । न किंचिदत्र शाश्वतमस्ति परमहं नद्यां स्नानार्थं गमिष्यामि । तत्त्वमात्मीयं शिशुमेतं [धनदेवनामानं] मया सह स्नानोपकरणहस्तं प्रेषय इति । सोऽपि चौर्यभयात्तस्य शङ्कितः स्वपुत्रमुवाच--- वत्स पितृव्योऽयं तव स्नानार्थं नद्यां यास्यति । तद्गम्यतामनेन सार्धं स्नानोपकरणमादाय इति । अथासौ वणिक्शिशुः स्नानोपकरणमादाय प्रहृष्टमनास्तेनाभ्यागतेन सह प्रस्थितः । तथानुष्ठिते वणिक्स्नात्वा तं शिशुं नदीगुहायां प्रक्षिप्य तद्द्वारं बृहच्छिलयाच्छाद्य सत्वरं गृहमागतः । पृष्टश्च तेन वणिजा--- भो अभ्यागत कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गत इति । स आह नदीतटात्स श्येनेन हृत इति । श्रेष्ठ्याह --- मिथ्यावादिन् किं क्वचिच्छ्येनो बालं हर्तुं शक्नोति। तत्समर्पय मे सुतम् । अन्यता राजकुले निवेदयिष्यामि इति । स आह--- भोः सत्यवादिन् यथा श्येनो बालं न नयति तथा मूषिका अपि लोहभारघटितां तुलां न भक्षयन्ति। तदर्पय मे तुलां यदि दारकेण प्रयोजनम् ।

The Lion, Jackal and the Cave (Kale pp 168/169)

कस्मिंश्चिद्वनोद्देशे खरनखरो नाम सिंहः प्रतिवसति स्म । स कदाचिदितश्चेतश्च परिभ्रमन् क्षुत्क्षामकण्ठो न किं चिदपि सत्त्वमाससाद । ततश्चास्तमनसमये महतीं गिरिगुहामासाद्य प्रविष्टश्चिन्तयामास -- नूनमेतस्यां गुहायां रात्रौ केनापि सत्त्वेनागन्तव्यम् । तन्निभृतो भूत्वा तिष्ठामि ।

एतस्मिन्नन्तरे तत्स्वामी दधिपुच्छो नाम शृगालः समायातः । स च यावत्पश्यति तावत्सिंहपदपद्धतिर्गुहायां प्रविष्टा न च निष्क्रान्ता । ततश्चाचिन्तयत् -- अहो विनष्टोऽस्मि । नूनमस्यामन्तर्गतेन सिंहेन भाव्यम् । तत्किं करोमि ।कथं ज्ञास्यामि । एवं विचिन्त्य द्वारस्थः फूत्कर्तुमारब्धः - अहो बिल अहो बिल इत्युक्त्वा तूष्णींभूय भूयोऽपि तथैव प्रत्यभाषत -- भोः किं न स्मरसि यन्मया त्वया सह समयः कृतोऽस्ति । यन्मया बाह्यात्समागतेन त्वं वक्तव्यः । त्वया चाहमाकारणीय इति । तद्यदि मां नाह्वयसि ततोऽहं द्वितीयं बिलं यास्यामि । अथ तच्छ्रुत्वा सिंहश्चिन्तितवान् -- नूनमेषा गुहास्य समागतस्य सदा समाह्वानं करोति । परमद्य मद्भयान्न किं चिद् ब्रूते । अथवा साध्विदमुच्यते – भयमंत्रस्तमनसां हस्तपादादिकाः क्रियाः ।

प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ।।

तदहमस्याह्वानं करोमि येन तदनुसारेण प्रविष्टोऽयं मे भोज्यतां यास्यति । एवं संप्रधार्य सिंहस्तस्याह्वानमकरोत् । अथ सिंहशब्देन सा गुहा प्रतिरवसंपूर्णान्यानपि दूरस्थानरण्यजीवांस्त्रासयामास । शृगालोऽपि पलायमान इमं श्लोकमपठत् - अनागतं यः कुरुते स शोभते स शोच्यते यो न करोत्यनागतम् । वनेऽत्र संस्थस्य समागता जरा विलस्य वाणी न कदापि मे श्रुता ।।

The Frog and the Snake (Kale p 173)

स्कन्धेनापि वहेच्छत्रुं कालमासाद्य बुद्धिमान् ।
महता कृष्णसर्पेण मण्डूका बहवो हताः ॥

मेघवर्ण आह – कथमेतत् । स्थिरजीवी कथयति --

अस्ति वरूणाद्रिममीपे एकस्मिन्प्रदेशे परिणतवया मन्दविषो नाम कृष्णसर्पः । स एवं चित्ते संचिन्तितवान् --कथं नाम मया सुखोपायवृत्त्या वर्तितव्यमिति । ततो बहुमण्डूकं ह्रदमुपगम्य धृतिपरीतमिवात्मानं दर्शितवान । अथ तथा स्थितः स उदकप्रान्तगतेनैकेन मण्डूकेन पृष्टः --माम किमद्य यथापूर्वमाहारार्थं न विहरसि ।

सोऽब्रवीत् --भद्र कुतो मे मन्दभाग्यस्याहाराभिलाषः* । यत्कारणमद्य रात्रौ प्रदोष एव मयाहारार्थं विहरमाणेन दृष्ट एको मण्डूकः । तद्ग्रहणार्थं मया क्रमः सञ्जितः । सोऽपि मां दृष्ट्वा मृत्युभयेन स्वाध्यायप्रसक्तानां ब्राह्मणानामन्तरपक्रान्तो न विभावितो मया क्वापि गतः । तत्सादृश्यमोहितचित्तेन मया कस्यचिद्ब्राह्मणस्य सूनोर्ह्रदतटजलान्तः स्थोऽङ्गष्ठो दष्टः । ततोऽसौ सपदि पञ्चत्वमुपागतः । अथ तस्य पित्रा दुःखितेनाहं शप्तो यथा --दुरात्मन् त्वया निरपराधो मत्सुतो दष्टः । तदनेन दोषेण त्वं मण्डूकानां वाहनं भविष्यसि । तत्प्रसादलब्धजीविकया वर्तिष्यसे इति । ततोऽहं युष्माकं वाहनार्थमागतोऽस्मि ।
